
# Celebration of Republic Day in SSSU Campus

# (26-01-2019)

Shree Somnath Sanskrit University celebrated the 70th Republic Day on 26th January 2019. Flag hoisting ceremony performed by Hon'ble Vice-Chancellor, Prof. Gopabandhu Mishra. In this occasion, all teaching and non-teaching staff and students paid tribute to the soldiers by performing many activities like singing, dancing etc.

## सर्वैभवं समाचरितं ७०तमं गणतन्त्रपर्व



विश्वविद्यालयपरिसरे गणतन्त्रदिवसस्य किञ्चन दृश्यम्

भारतस्य गणतन्त्रं भारतस्य आत्मा वर्तते। अतः प्रतिवर्षमिव अस्मिन्नपि संवत्सरे श्रीसोमनाथसंस्कृतविश्वविद्यालये गणतन्त्रदिवसस्य आचरणं विश्वविद्यालयपरिसरे सोत्साहं समाचरितम्। अस्मिन् कार्यक्रमे अध्यक्षरूपेण मान्याः कुलपतयः उपस्थिताः भूत्वा ध्वजोत्तोलनमकार्षुः।

अत्रावसरे कार्यकारि-कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागस्य अध्यक्षा प्रो. अर्चनादुबे, प्रो. देवेन्द्रनाथपाण्डेयः, वेरावलजनपदस्य भारतीयजनतादलस्य उपप्रमुखः डॉ. जयेशभाई वघासिया, वेरावलनगर-वैद्यसङ्घस्य प्रमुखः डॉ. सञ्जयभाई परमारः, विश्वविद्यालयस्य सर्वेऽपि आचार्याः, उपाचार्याः, सहायकाचार्याः, अधिकारिणः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य आरम्भः ध्वजोत्तोलनेन सह सम्भूय राष्ट्रगानेन अभूत्। तदनु अध्यक्षत्वेन वदता श्रीमता कुलपतिना अभाणि यत् अस्माकं पूर्वजैः हुतात्मभिः अस्य देशस्य स्वतन्त्रता तु प्राप्ता परम् इदम् अस्माकं दायित्वं वर्तते यत् इदं राष्ट्रं वास्तविकरीत्या सुराष्ट्रं भवेत् तदर्थं सर्वैः नागरिकैः स्वकर्तव्यानि सुचारुतया अवश्यं पालनीयानि। [illegible]नीयकुलपतेः उद्बोधनानन्तरं छात्रैः भाषण-गीत-नाटक-योगाभ्यासादिकार्यक्रमाः समायोजिताः आसन्। अस्मिन् गणतन्त्रपर्वसमाचरणे एकमेतदपि वैशिष्ट्यमासीत् यत् कार्यक्रमान्ते विश्वविद्यालयस्य सर्वैः छात्राध्यापकाधिकारिकर्मचारिभिः पुष्पाञ्जलिसमर्पणपुरस्सरं भारतमातुः समर्चनम् अकारि। अस्य समग्रकार्यक्रमस्य सञ्चालनम् अनुस्नातकाध्यक्षायाः प्रो. अर्चनादुबेमहोदयायाः निर्देशने डॉ. जयेशमुंगरा अकरोत्।



विश्वविद्यालयपरिसरे उपस्थिताः प्राध्यापकाः छात्राः कर्मचारिणश्च

छात्रैः प्रदर्शितस्य सांस्कृतिककार्यक्रमस्य किश्चन दृश्यम्

भारतमातुः पूजनम्

Report Source: **SOMJYOTI**- University Newsletter (Issue: 19, page no. 07)




श्री सोमनाथ
संस्कृत युनिवर्सिटी
व्यक्ति को नहीं,
परन्तु समग्र आने वाली
पीढ़ियों को तैयार करेगी।
यहाँ से पीढ़ियों का
निर्माण होगा।
इस विश्वविद्यालय के रूप में
मनुष्य निर्माण रूपी
महा अभियान का
प्रारम्भ हो चुका है।
-श्री नरेन्द्र मोदी


प्रभासज्योतिः
शैक्षणिकं भवनम्


AVOID USE OF MOBILE IN ACADEMIC BUILDING
RAGGING IS A PUNISHABLE OFFENCE
NO SMOKING
KEEP CLEAN